(49)[P7] 4.6.2.2(44)- असुतृपः ।

असुतृप इत्यसु - तृपः ।

(50)[P7] 4.6.2.2(45)- उक्थशासः । चरन्ति ॥

उक्थशास श्चरन्ति चरन् त्युक्थशास उक्थशास श्चरन्ति ।

(51)[P7] 4.6.2.2(45)- उक्थशासः ।

उक्थशास इत्युक्थ - शासः ।

(52)[P7] 4.6.2.2(46)- चरन्ति ॥

चरन्तीति चरन्ति ।

(53)[P7] 4.6.2.2(47)- परः । दिवा । परः ।

परो दिवा दिवा परः परो दिवा परः परो दिवा परः परो दिवा परः ।

(54)[P7] 4.6.2.2(48)- दिवा । परः । एना ।

दिवा परः परो दिवा दिवा पर एनैना परो दिवा दिवा पर एना ।

(55)[P7] 4.6.2.2(49)- परः । एना । पृथिव्या ।

पर एनैना परः पर एना पृथिव्या पृथिव्यैना परः पर एना पृथिव्या ।

(56)[P7] 4.6.2.2(50)- एना । पृथिव्या । परः ।

एना पृथिव्या पृथि व्यैनैना पृथिव्या परः परः पृथि व्यैनैना पृथिव्या परः ।

(1)[P8] 4.6.2.3(1)- पृथिव्या । परः । देवेभिः ।

पृथिव्या परः परः पृथिव्या पृथिव्या परो देवेभिर् देवेभिः परः पृथिव्या पृथिव्या परो देवेभिः ।

(2)[P8] 4.6.2.3(2)- परः । देवेभिः । असुरैः ।

परो देवेभिर् देवेभिः परः परो देवेभि रसुरै रसुरैर् देवेभिः परः परो देवेभि रसुरैः ।

(3)[P8] 4.6.2.3(3)- देवेभिः । असुरैः । गुहा ।

देवेभि रसुरै रसुरैर् देवेभिर् देवेभि रसुरैर् गुहा गुहाऽसुरैर् देवेभिर् देवेभि रसुरैर् गुहा ।

(4)[P8] 4.6.2.3(4)- असुरैः । गुहा । यत् ॥

असुरैर् गुहा गुहाऽसुरै रसुरैर् गुहा यद् यद् गुहाऽसुरै रसुरैर् गुहा यत् ।

(5)[P8] 4.6.2.3(5)- गुहा । यत् ॥

गुहा यद् यद् गुहा गुहा यत् ।

(6)[P8] 4.6.2.3(6)- यत् ॥

यदिति यत् ।

(7)[P8] 4.6.2.3(7)- कम् । स्वित् । गर्भम् । (GS-4.6-13)

क(गग्) स्विथ् स्वित् कम् क(गग्) स्विद् गर्भम् गर्भ(गग्) स्वित् कम् क(गग्) स्विद् गर्भम् ।

(8)[P8] 4.6.2.3(8)- स्वित् । गर्भम् । प्रथमम् । (GS-4.6-13)

स्विद् गर्भम् गर्भ(गग्) स्विथ् स्विद् गर्भम् प्रथमम् प्रथमम् गर्भ(गग्) स्विथ् स्विद् गर्भम् प्रथमम् ।

(9)[P8] 4.6.2.3(9)- गर्भम् । प्रथमम् । दद्ध्रे । (GS-4.6-13)

गर्भम् प्रथमम् प्रथमम् गर्भम् गर्भम् प्रथमम् दद्ध्रे दद्ध्रे प्रथमम् गर्भम् गर्भम् प्रथमम् दद्ध्रे ।

(10)[P8] 4.6.2.3(10)- प्रथमम् । दद्ध्रे । आपः । (GS-4.6-13)

प्रथमम् दद्ध्रे दद्ध्रे प्रथमम् प्रथमम् दद्ध्र आप आपो दद्ध्रे प्रथमम् प्रथमम् दद्ध्र आपः ।

(11)[P8] 4.6.2.3(11)- दद्ध्रे । आपः । यत्र । (GS-4.6-13)

दद्ध्र आप आपो दद्ध्रे दद्ध्र आपो यत्र यत्रापो दद्ध्रे दद्ध्र आपो यत्र ।

(12)[P8] 4.6.2.3(12)- आपः । यत्र । देवाः । (GS-4.6-13)

आपो यत्र यत्राप आपो यत्र देवा देवा यत्राप आपो यत्र देवाः ।

(13)[P8] 4.6.2.3(13)- यत्र । देवाः । समगच्छन्त ।

यत्र देवा देवा यत्र यत्र देवाः समगच्छन्त समगच्छन्त देवा यत्र यत्र देवाः समगच्छन्त ।

(14)[P8] 4.6.2.3(14)- देवाः । समगच्छन्त । विश्वे ॥

देवाः समगच्छन्त समगच्छन्त देवा देवाः समगच्छन्त विश्वे विश्वे समगच्छन्त देवा देवाः समगच्छन्त विश्वे ।

(15)[P8] 4.6.2.3(15)- समगच्छन्त । विश्वे ॥

समगच्छन्त विश्वे विश्वे समगच्छन्त समगच्छन्त विश्वे ।

(16)[P8] 4.6.2.3(15)- समगच्छन्त ।

समगच्छन्तेति सं - अगच्छन्त ।

(17)[P8] 4.6.2.3(16)- विश्वे ॥

विश्व इति विश्वे ।

(18)[P8] 4.6.2.3(17)- तम् । इत् । गर्भम् ।

त मिदित् तम् त मिद् गर्भम् गर्भ मित् तम् त मिद् गर्भम् ।

(19)[P8] 4.6.2.3(18)- इत् । गर्भम् । प्रथमम् ।

इद् गर्भम् गर्भ मिदिद् गर्भम् प्रथमम् प्रथमम् गर्भ मिदिद् गर्भम् प्रथमम् ।

(20)[P8] 4.6.2.3(19)- गर्भम् । प्रथमम् । दद्ध्रे ।

गर्भम् प्रथमम् प्रथमम् गर्भम् गर्भम् प्रथमम् दद्ध्रे दद्ध्रे प्रथमम् गर्भम् गर्भम् प्रथमम् दद्ध्रे ।

(21)[P8] 4.6.2.3(20)- प्रथमम् । दद्ध्रे । आपः ।

प्रथमम् दद्ध्रे दद्ध्रे प्रथमम् प्रथमम् दद्ध्र आप आपो दद्ध्रे प्रथमम् प्रथमम् दद्ध्र आपः ।

(22)[P8] 4.6.2.3(21)- दद्ध्रे । आपः । यत्र ।

दद्ध्र आप आपो दद्ध्रे दद्ध्र आपो यत्र यत्रापो दद्ध्रे दद्ध्र आपो यत्र ।

(23)[P8] 4.6.2.3(22)- आपः । यत्र । देवाः ।

आपो यत्र यत्राप आपो यत्र देवा देवा यत्राप आपो यत्र देवाः ।

(24)[P8] 4.6.2.3(23)- यत्र । देवाः । समगच्छन्त ।

यत्र देवा देवा यत्र यत्र देवाः समगच्छन्त समगच्छन्त देवा यत्र यत्र देवाः समगच्छन्त ।

(25)[P8] 4.6.2.3(24)- देवाः । समगच्छन्त । विश्वे ॥

देवाः समगच्छन्त समगच्छन्त देवा देवाः समगच्छन्त विश्वे विश्वे समगच्छन्त देवा देवाः समगच्छन्त विश्वे ।

(26)[P8] 4.6.2.3(25)- समगच्छन्त । विश्वे ॥

समगच्छन्त विश्वे विश्वे समगच्छन्त समगच्छन्त विश्वे ।

(27)[P8] 4.6.2.3(25)- समगच्छन्त ।

समगच्छन्तेति सं - अगच्छन्त ।

(28)[P8] 4.6.2.3(26)- विश्वे ॥

विश्व इति विश्वे ।

(29)[P8] 4.6.2.3(27)- अजस्य । नाभौ । अधि ।

अजस्य नाभौ नाभा वजस्या जस्य नाभा वध्यधि नाभा वजस्या जस्य नाभा वधि ।

(30)[P8] 4.6.2.3(28)- नाभौ । अधि । एकम् ।

नाभा वध्यधि नाभौ नाभा वध्येक मेक मधि नाभौ नाभा वध्येकम् ।

(31)[P8] 4.6.2.3(29)- अधि । एकम् । अर्पितम् ।

अध्येक मेक मध्यध्येक मर्पित मर्पित मेक मध्यध्येक मर्पितम् ।

(32)[P8] 4.6.2.3(30)- एकम् । अर्पितम् । यस्मिन्न् ।

एक मर्पित मर्पित मेक मेक मर्पितं ँयस्मिन्. यस्मिन् नर्पित मेक मेक मर्पितं ँयस्मिन्न् ।

(33)[P8] 4.6.2.3(31)- अर्पितम् । यस्मिन्न् । इदम् ।

अर्पितं ँयस्मिन्. यस्मिन् नर्पित मर्पितं ँयस्मिन् निद मिदं ँयस्मिन् नर्पित मर्पितं ँयस्मिन् निदम् ।

(34)[P8] 4.6.2.3(32)- यस्मिन्न् । इदम् । विश्वम् ।

यस्मिन् निद मिदं ँयस्मिन्. यस्मिन् निदं ँविश्वं ँविश्व मिदं ँयस्मिन्. यस्मिन् निदं ँविश्वम् ।

(35)[P8] 4.6.2.3(33)- इदम् । विश्वम् । भुवनम् ।

इदं ँविश्वं ँविश्व मिद मिदं ँविश्वम् भुवनम् भुवनं ँविश्व मिद मिदं ँविश्वम् भुवनम् ।

(36)[P8] 4.6.2.3(34)- विश्वम् । भुवनम् । अधि ।

विश्वम् भुवनम् भुवनं ँविश्वं ँविश्वम् भुवन मध्यधि भुवनं ँविश्वं ँविश्वम् भुवन मधि ।

(37)[P8] 4.6.2.3(35)- भुवनम् । अधि । श्रितम् ॥

भुवन मध्यधि भुवनम् भुवन मधि श्रित(ग्ग्) श्रित मधि भुवनम् भुवन मधि श्रितम् ।

(38)[P8] 4.6.2.3(36)- अधि । श्रितम् ॥

अधि श्रित(ग्ग्) श्रित मध्यधि श्रितम् ।

(39)[P8] 4.6.2.3(37)- श्रितम् ॥

श्रितमिति श्रितम् ।

(40)[P8] 4.6.2.3(38)- विश्वकर्मा । हि । अजनिष्ट । (GS-4.6-14)

विश्वकर्मा हि हि विश्वकर्मा विश्वकर्मा ह्यजनिष्टा जनिष्ट हि विश्वकर्मा विश्वकर्मा ह्यजनिष्ट ।

(41)[P8] 4.6.2.3(38)- विश्वकर्मा । (GS-4.6-14)

विश्वकर्मेति विश्व - कर्मा ।

(42)[P8] 4.6.2.3(39)- हि । अजनिष्ट । देवः । (GS-4.6-14)

ह्यजनिष्टा जनिष्ट हि ह्यजनिष्ट देवो देवो ऽजनिष्ट हि ह्यजनिष्ट देवः ।

(43)[P8] 4.6.2.3(40)- अजनिष्ट । देवः । आत् । (GS-4.6-14)

अजनिष्ट देवो देवो ऽजनिष्टा जनिष्ट देव आदाद् देवो ऽजनिष्टा जनिष्ट देव आत् ।

(44)[P8] 4.6.2.3(41)- दे॒वः । आत् । इत् । (GS-4.6-14)

दे॒व आदाद् दे॒वो दे॒व आदिदि दाद् दे॒वो दे॒व आदित् ।

(45)[P8] 4.6.2.3(42)- आत् । इत् । ग॒न्ध॒र्वः । (GS-4.6-14)

आदिदि दादा दिद् ग॑न्ध॒र्वो ग॑न्ध॒र्व इदादा दिद् ग॑न्ध॒र्वः ।

(46)[P8] 4.6.2.3(43)- इत् । ग॒न्ध॒र्वः । अ॒भ॒व॒त् । (GS-4.6-14)

इद् ग॑न्ध॒र्वो ग॑न्ध॒र्व इदिद् ग॑न्ध॒र्वो अ॑भव दभवद् गन्ध॒र्व इदिद् ग॑न्ध॒र्वो अ॑भवत् ।

(47)[P8] 4.6.2.3(44)- ग॒न्ध॒र्वः । अ॒भ॒व॑त् । द्वि॒तीय॑ः ॥

ग॒न्ध॒र्वो अ॑भव दभवद् गन्ध॒र्वो ग॑न्ध॒र्वो अ॑भवद् द्वि॒तीयो॑ द्वि॒तीयो॑ अभवद् गन्ध॒र्वो ग॑न्ध॒र्वो

अ॑भवद् द्वि॒तीय॑ः ।

(48)[P8] 4.6.2.3(45)- अ॒भ॒व॒त् । द्वि॒तीय॑ः ॥

अ॒भ॒व॒द् द्वि॒तीयो॑ द्वि॒तीयो॑ अभव दभवद् द्वि॒तीय॑ः ।

(49)[P8] 4.6.2.3(46)- द्वि॒तीय॑ः ॥

द्वि॒ती॒य॑ इति॑ द्वि॒तीय॑ः ।

(50)[P8] 4.6.2.3(47)- तृ॒तीय॑ः । पि॒ता । ज॒नि॒ता ।

तृ॒तीय॑ः पि॒ता पि॒ता तृ॒तीय॑ स्तृ॒तीय॑ः पि॒ता ज॑नि॒ता ज॑नि॒ता पि॒ता तृ॒तीय॑ स्तृ॒तीय॑ः पि॒ता ज॑नि॒ता ।

(51)[P8] 4.6.2.3(48)- पि॒ता । ज॒नि॒ता । ओष॑धीनाम् ।

पि॒ता ज॑नि॒ता ज॑नि॒ता पि॒ता पि॒ता ज॑नि॒तौष॑धीना॒ मोष॑धीनाम् जनि॒ता पि॒ता पि॒ता

ज॑नि॒तौष॑धीनाम् ।

(52)[P8] 4.6.2.3(49)- ज॒नि॒ता । ओष॑धीनाम् । अ॒पाम् ।

ज॒नि॒तौष॑धीना॒ मोष॑धीनाम् जनि॒ता ज॑नि॒तौष॑धीना म॒पा म॒पा मोष॑धीनाम् जनि॒ता ज॑नि॒तौष॑धीना

म॒पाम् ।

(53)[P8] 4.6.2.3(50)- ओषधीनाम् । अपाम् । गर्भम् ।

ओषधीना मपा मपा मोषधीना मोषधीना मपाम् गर्भम् गर्भ मपा मोषधीना मोषधीना मपाम् गर्भम् ।

(1)[P9] 4.6.2.4(1)- अपाम् । गर्भम् । वि ।

अपाम् गर्भम् गर्भ मपा मपाम् गर्भं ँवि वि गर्भ मपा मपाम् गर्भं ँवि ।

(2)[P9] 4.6.2.4(2)- गर्भम् । वि । अदधात् ।

गर्भं ँवि वि गर्भम् गर्भं ँव्यदधा ददधाद् वि गर्भम् गर्भं ँव्यदधात् ।

(3)[P9] 4.6.2.4(3)- वि । अदधात् । पुरुत्रा ॥

व्यदधा ददधाद् वि व्यदधात् पुरुत्रा पुरुत्रा ऽदधाद् वि व्यदधात् पुरुत्रा ।

(4)[P9] 4.6.2.4(4)- अदधात् । पुरुत्रा ॥

अदधात् पुरुत्रा पुरुत्रा ऽदधा ददधात् पुरुत्रा ।

(5)[P9] 4.6.2.4(5)- पुरुत्रा ॥

पुरुत्रेति पुरु – त्रा ।

(6)[P9] 4.6.2.4(6)- चक्षुषः । पिता । मनसा ।

चक्षुषः पिता पिता चक्षुष श्चक्षुषः पिता मनसा मनसा पिता चक्षुष श्चक्षुषः पिता मनसा ।

(7)[P9] 4.6.2.4(7)- पिता । मनसा । हि ।

पिता मनसा मनसा पिता पिता मनसा हि हि मनसा पिता पिता मनसा हि ।

(8)[P9] 4.6.2.4(8)- मनसा । हि । धीरः ।

मनसा हि हि मनसा मनसा हि धीरो धीरो हि मनसा मनसा हि धीरः ।

(9)[P9] 4.6.2.4(9)- हि । धीरः । घृतम् ।

हि धीरो धीरो हि हि धीरो घृतम् घृतम् धीरो हि हि धीरो घृतम् ।

(10)[P9] 4.6.2.4(10)- धीरः । घृतम् । एने ।

धीरो घृतम् घृतम् धीरो धीरो घृत मेने एने घृतम् धीरो धीरो घृत मेने ।

(11)[P9] 4.6.2.4(11)- घृतम् । एने । अजनत् ।

घृत मेने एने घृतम् घृत मेने अजन दजन देने घृतम् घृत मेने अजनत् ।

(12)[P9] 4.6.2.4(12)- एने । अजनत् । नन्नमाने ॥

एने अजन दजन देने एने अजनन् नन्नमाने नन्नमाने अजन देने एने अजनन् नन्नमाने ।

(13)[P9] 4.6.2.4(12)- एने ।

एने इत्येने ।

(14)[P9] 4.6.2.4(13)- अजनत् । नन्नमाने ॥

अजनन् नन्नमाने नन्नमाने अजन दजनन् नन्नमाने ।

(15)[P9] 4.6.2.4(14)- नन्नमाने ॥

नन्नमाने इति नन्नमाने ।

(16)[P9] 4.6.2.4(15)- यदा । इत् । अन्ताः । (GS-4.6-15)

यदेदिद् यदा यदे दन्ता अन्ता इद् यदा यदे दन्ताः ।

(17)[P9] 4.6.2.4(16)- इत् । अन्ताः । अददृ(ग्म्)हन्त । (GS-4.6-15)

इदन्ता अन्ता इदिदन्ता अददृ(ग्म्)हन्ता ददृ(ग्म्)हन्ता न्ता इदिदन्ता अददृ(ग्म्)हन्त ।

(18)[P9] 4.6.2.4(17)- अन्ताः । अददृ(ग्म्)हन्त । पूर्वे । (GS-4.6-15)

अन्ता अददृ(ग्म्)हन्ता ददृ(ग्म्)हन्ता न्ता अन्ता अददृ(ग्म्)हन्त पूर्वे पूर्वे अददृ(ग्म्)हन्ता न्ता अन्ता अददृ(ग्म्)हन्त पूर्वे ।

(19)[P9] 4.6.2.4(18)- अददृ(ग्म्)हन्त । पूर्वे । आत् । (GS-4.6-15)

अददृ(ग्म्)हन्त पूर्वे पूर्वे अददृ(ग्म्)हन्ता ददृ(ग्म्)हन्त पूर्व आदात् पूर्वे अददृ(ग्म्)हन्ता ददृ(ग्म्)हन्त पूर्व आत् ।

(20)[P9] 4.6.2.4(19)- पूर्वे । आत् । इत् । (GS-4.6-15)

पूर्व आदात् पूर्वे पूर्व आदिदि दात् पूर्वे पूर्व आदित् ।

(21)[P9] 4.6.2.4(20)- आत् । इत् । द्यावापृथिवी । (GS-4.6-15)

आदिदिदा दादिद् द्यावापृथिवी द्यावापृथिवी इदादा दिद् द्यावापृथिवी ।

(22)[P9] 4.6.2.4(21)- इत् । द्यावापृथिवी । अप्रथेताम् ॥ (GS-4.6-15)

इद् द्यावापृथिवी द्यावापृथिवी इदिद् द्यावापृथिवी अप्रथेता मप्रथेताम् द्यावापृथिवी इदिद् द्यावापृथिवी अप्रथेताम् ।

(23)[P9] 4.6.2.4(22)- द्यावापृथिवी । अप्रथेताम् ॥

द्यावापृथिवी अप्रथेता मप्रथेताम् द्यावापृथिवी द्यावापृथिवी अप्रथेताम् ।

(24)[P9] 4.6.2.4(22)- द्यावापृथिवी ।

द्यावापृथिवी इति द्यावा - पृथिवी ।

(25)[P9] 4.6.2.4(23)- अप्रथेताम् ॥

अप्रथेतामित्यप्रथेताम् ।

(26)[P9] 4.6.2.4(24)- विश्वतश्चक्षुः । उत । विश्वतोमुखः ।

विश्वतश्चक्षु रुतोत विश्वतश्चक्षुर् विश्वतश्चक्षु रुत विश्वतोमुखो विश्वतोमुख उत विश्वतश्चक्षुर् विश्वतश्चक्षु रुत विश्वतोमुखः ।

(27)[P9] 4.6.2.4(24)- विश्वतश्चक्षुः ।

विश्वतश्चक्षुरिति विश्वतः - चक्षुः ।

(28)[P9] 4.6.2.4(25)- उत । विश्वतोमुखः । विश्वतोहस्तः ।

उत विश्वतोमुखो विश्वतोमुख उतोत विश्वतोमुखो विश्वतोहस्तो विश्वतोहस्तो विश्वतोमुख उतोत विश्वतोमुखो विश्वतोहस्तः ।

(29)[P9] 4.6.2.4(26)- विश्वतोमुखः । विश्वतोहस्तः । उत ।

विश्वतोमुखो विश्वतोहस्तो विश्वतोहस्तो विश्वतोमुखो विश्वतोमुखो विश्वतोहस्त उतोत विश्वतोहस्तो विश्वतोमुखो विश्वतोमुखो विश्वतोहस्त उत ।

(30)[P9] 4.6.2.4(26)- विश्वतोमुखः ।

विश्वतोमुख इति विश्वतः - मुखः ।

(31)[P9] 4.6.2.4(27)- विश्वतोहस्तः । उत । विश्वतस्पात् ॥

विश्वतोहस्त उतोत विश्वतोहस्तो विश्वतोहस्त उत विश्वतस्पाद् विश्वतस्पा दुत विश्वतोहस्तो विश्वतोहस्त उत विश्वतस्पात् ।

(32)[P9] 4.6.2.4(27)- विश्वतोहस्तः ।

विश्वतोहस्त इति विश्वतः - हस्तः ।

(33)[P9] 4.6.2.4(28)- उत । विश्वतस्पात् ॥

उत विश्वतस्पाद् विश्वतस्पादुतोत विश्वतस्पात् ।

(34)[P9] 4.6.2.4(29)- विश्वतस्पात् ॥

विश्वतस्पादिति विश्वतः - पात् ।

(35)[P9] 4.6.2.4(30)- सम् । बाहुभ्याम् । नमति ।

सम् बाहुभ्याम् बाहुभ्या(ग्म्) स(ग्म्) सम् बाहुभ्याम् नमति नमति बाहुभ्या(ग्म्) स(ग्म्) सम् बाहुभ्याम् नमति ।

(36)[P9] 4.6.2.4(31)- बा॒हुभ्या॑म् । नम॑ति । सम् ।

बा॒हु॒भ्या॒म् नम॑ति॒ नम॑ति बा॒हुभ्या॑म् बा॒हुभ्या॒म् नम॑ति॒ स(ग्म्) सम् नम॑ति बा॒हुभ्या॑म् बा॒हुभ्या॒म् नम॑ति॒ सम् ।

(37)[P9] 4.6.2.4(31)- बा॒हुभ्या॑म् ।

बा॒हु॒भ्यामिति॑ बा॒हु - भ्या॒म् ।

(38)[P9] 4.6.2.4(32)- नम॑ति । सम् । प॒तत्रैः॑ ।

नम॑ति॒ स(ग्म्) सम् नम॑ति॒ नम॑ति॒ सम् प॒तत्रैः॑ प॒तत्रैः॑ सम् नम॑ति॒ नम॑ति॒ सम् प॒तत्रैः॑ ।

(39)[P9] 4.6.2.4(33)- सम् । प॒तत्रैः॑ । द्यावा॑पृथि॒वी ।

सम् प॒तत्रैः॑ प॒तत्रैः॑ स(ग्म्) सम् प॒तत्रै॑र् द्यावा॑पृथि॒वी द्यावा॑पृथि॒वी प॒तत्रैः॑ स(ग्म्) सम् प॒तत्रै॑र् द्यावा॑पृथि॒वी ।

(40)[P9] 4.6.2.4(34)- प॒तत्रैः॑ । द्यावा॑पृथि॒वी । ज॒नय॑न्न् ।

प॒तत्रै॑र् द्यावा॑पृथि॒वी द्यावा॑पृथि॒वी प॒तत्रैः॑ प॒तत्रै॑र् द्यावा॑पृथि॒वी ज॒नय॑न् ज॒न॒य॒न् द्यावा॑पृथि॒वी प॒तत्रैः॑ प॒तत्रै॑र् द्यावा॑पृथि॒वी ज॒नय॑न्न् ।

(41)[P9] 4.6.2.4(35)- द्यावा॑पृथि॒वी । ज॒नय॑न्न् । दे॒वः ।

द्यावा॑पृथि॒वी ज॒नय॑न् ज॒न॒य॒न् द्यावा॑पृथि॒वी द्यावा॑पृथि॒वी ज॒नय॑न् दे॒वो दे॒वो ज॒न॒य॒न् द्यावा॑पृथि॒वी द्यावा॑पृथि॒वी ज॒नय॑न् दे॒वः ।

(42)[P9] 4.6.2.4(35)- द्यावा॑पृथि॒वी ।

द्यावा॑पृथि॒वी इति॒ द्यावा᳚ - पृ॒थि॒वी ।

(43)[P9] 4.6.2.4(36)- ज॒नय॑न्न् । दे॒वः । एकः॑ ॥

ज॒नय॑न् दे॒वो दे॒वो ज॒नय॑न् ज॒नय॑न् दे॒व एक॒ एको॑ दे॒वो ज॒नय॑न् ज॒नय॑न् दे॒व एकः॑ ।

(44)[P9] 4.6.2.4(37)- देवः । एकः ॥

देव एक एको देवो देव एकः ।

(45)[P9] 4.6.2.4(38)- एकः ॥

एक इत्येकः ।

(46)[P9] 4.6.2.4(39)- किम् । स्वित् । आसीत् । (GD-58)

कि(गग्) स्विथ् स्वित् किम् कि(गग्) स्विदासी दासीथ् स्वित् किम् कि(गग्) स्विदासीत् ।

(47)[P9] 4.6.2.4(40)- स्वित् । आसीत् । अधिष्ठानम् । (GD-58)

स्विदा सीदासीथ् स्विथ् स्विदासी दधिष्ठान मधिष्ठान मासीथ् स्विथ् स्विदासी दधिष्ठानम् ।

(48)[P9] 4.6.2.4(41)- आसीत् । अधिष्ठानम् । आरंभणम् । (GD-58)

आसी दधिष्ठान मधिष्ठान मासी दासी दधिष्ठान मारंभण मारंभण मधिष्ठान मासी दासी दधिष्ठान मारंभणम् ।

(49)[P9] 4.6.2.4(42)- अधिष्ठानम् । आरंभणम् । कतमत् ।

अधिष्ठान मारंभण मारंभण मधिष्ठान मधिष्ठान मारंभणम् कतमत् कतम दारंभण मधिष्ठान मधिष्ठान मारंभणम् कतमत् ।

(50)[P9] 4.6.2.4(42)- अधिष्ठानम् ।

अधिष्ठानमित्यधि - स्थानम् ।

(51)[P9] 4.6.2.4(43)- आरंभणम् । कतमत् । स्वित् । (GS-4.6-16)

आरंभणम् कतमत् कतम दारंभण मारंभणम् कतमथ् स्विथ् स्वित् कतम दारंभण मारंभणम् कतमथ् स्वित् ।

(52)[P9] 4.6.2.4(43)- आरंभणम् । (GS-4.6-16)

आरंभणमित्या - रंभणम् ।

(53)[P9] 4.6.2.4(44)- कतमत् । स्वित् । किम् । (GS-4.6-16)

कतमथ् स्विथ् स्वित् कतमत् कतमथ् स्वित् किम् कि(गग्) स्वित् कतमत् कतमथ् स्वित् किम् ।

(54)[P9] 4.6.2.4(45)- स्वित् । किम् । आसीत् ॥ (GS-4.6-16)

स्वित् किम् कि(गग्) स्विथ् स्वित् कि मासी दासीत् कि(गग्) स्विथ् स्वित् कि मासीत् ।

(55)[P9] 4.6.2.4(46)- किम् । आसीत् ॥ (GS-4.6-16)

कि मासी दासीत् किम् कि मासीत् ।

(56)[P9] 4.6.2.4(47)- आसीत् ॥ (GS-4.6-16)

आसीदित्यासीत् ।

(57)[P9] 4.6.2.4(48)- यदि । भूमिम् । जनयन्न् ।

यदी भूमिम् भूमिं ँयदि यदी भूमिम् जनयन् जनयन् भूमिं ँयदि यदी भूमिम् जनयन्न् ।

(58)[P9] 4.6.2.4(49)- भूमिम् । जनयन्न् । विश्वकर्मा ।

भूमिम् जनयन् जनयन् भूमिम् भूमिम् जनयन् विश्वकर्मा विश्वकर्मा जनयन् भूमिम् भूमिम् जनयन् विश्वकर्मा ।

(59)[P9] 4.6.2.4(50)- जनयन्न् । विश्वकर्मा । वि ।

जनयन् विश्वकर्मा विश्वकर्मा जनयन् जनयन् विश्वकर्मा वि वि विश्वकर्मा जनयन् जनयन् विश्वकर्मा वि ।

(1)[P10] 4.6.2.5(1)- विश्वकर्मा । वि । द्याम् ।

विश्वकर्मा वि वि विश्वकर्मा विश्वकर्मा वि द्याम् द्यां ँवि विश्वकर्मा विश्वकर्मा वि द्याम् ।

(2)[P10] 4.6.2.5(1)- विश्वकर्मा ।

विश्वकर्मेति विश्व - कर्मा ।

(3)[P10] 4.6.2.5(2)- वि । द्याम् । और्णोत् ।

वि द्याम् द्यां ँवि वि द्या मौर्णो दौर्णोद् द्यां ँवि वि द्या मौर्णोत् ।

(4)[P10] 4.6.2.5(3)- द्याम् । और्णोत् । महिना ।

द्या मौर्णो दौर्णोद् द्याम् द्या मौर्णोन् महिना महि नौर्णोद् द्याम् द्या मौर्णोन् महिना ।

(5)[P10] 4.6.2.5(4)- और्णोत् । महिना । विश्वचक्षाः ॥

और्णोन् महिना महि नौर्णो दौर्णोन् महिना विश्वचक्षा विश्वचक्षा महि नौर्णो दौर्णोन् महिना विश्वचक्षाः ।

(6)[P10] 4.6.2.5(5)- महिना । विश्वचक्षाः ॥

महिना विश्वचक्षा विश्वचक्षा महिना महिना विश्वचक्षाः ।

(7)[P10] 4.6.2.5(6)- विश्वचक्षाः ॥

विश्वचक्षा इति विश्व - चक्षाः ।

(8)[P10] 4.6.2.5(7)- किम् । स्वित् । वनम् । (GS-4.6-17)

कि(गं्) स्विथ् स्वित् किम् कि(गं्) स्विद् वनं ँवन(गं्) स्वित् किम् कि(गं्) स्विद् वनम् ।

(9)[P10] 4.6.2.5(8)- स्वित् । वनम् । कः । (GS-4.6-17)

स्विद् वनं ँवन(गं्) स्विथ् स्विद् वनम् कः को वन(गं्) स्विथ् स्विद् वनम् कः ।

(10)[P10] 4.6.2.5(9)- वनम् । कः । उ । (GS-4.6-17)

वनम् कः को वनं ँवनम् क उ वु को वनं ँवनम् क उ ।

(11)[P10] 4.6.2.5(10)- कः । उ । सः । (GS-4.6-17)

क उ वु कः क उ स स उ कः क उ सः ।

(12)[P10] 4.6.2.5(11)- उ । सः । वृक्षः । (GS-4.6-17)

उ स स उ वु स वृक्षो वृक्षः स उ वु स वृक्षः ।

(13)[P10] 4.6.2.5(12)– सः । वृक्षः । आसीत् । (GS–4.6–17)

स वृक्षो वृक्षः स स वृक्ष आसी दासीद् वृक्षः स स वृक्ष आसीत् ।

(14)[P10] 4.6.2.5(13)– वृक्षः । आसीत् । यतः । (GS–4.6–17)

वृक्ष आसी दासीद् वृक्षो वृक्ष आसीद् यतो यत आसीद् वृक्षो वृक्ष आसीद् यतः ।

(15)[P10] 4.6.2.5(14)– आसीत् । यतः । द्यावापृथिवी । (GS–4.6–17)

आसीद् यतो यत आसी दासीद् यतो द्यावापृथिवी द्यावापृथिवी यत आसी दासीद् यतो द्यावापृथिवी ।

(16)[P10] 4.6.2.5(15)– यतः । द्यावापृथिवी । निष्टतक्षुः ॥ (GS–4.6–17)

यतो द्यावापृथिवी द्यावापृथिवी यतो यतो द्यावापृथिवी निष्टतक्षुर् निष्टतक्षुर् द्यावापृथिवी यतो यतो द्यावापृथिवी निष्टतक्षुः ।

(17)[P10] 4.6.2.5(16)– द्यावापृथिवी । निष्टतक्षुः ॥

द्यावापृथिवी निष्टतक्षुर् निष्टतक्षुर् द्यावापृथिवी द्यावापृथिवी निष्टतक्षुः ।

(18)[P10] 4.6.2.5(16)– द्यावापृथिवी ।

द्यावापृथिवी इति द्यावा – पृथिवी ।

(19)[P10] 4.6.2.5(17)– निष्टतक्षुः ॥

निष्टतक्षुरिति निः – ततक्षुः ।

(20)[P10] 4.6.2.5(18)– मनीषिणः । मनसा । पृच्छत । (GS–4.6–18)

मनीषिणो मनसा मनसा मनीषिणो मनीषिणो मनसा पृच्छत पृच्छत मनसा मनीषिणो मनीषिणो मनसा पृच्छत ।

(21)[P10] 4.6.2.5(19)– मनसा । पृच्छत । इत् । (GS–4.6–18)

मनसा पृच्छत पृच्छत मनसा मनसा पृच्छतेदित् पृच्छत मनसा मनसा पृच्छतेत् ।

(22)[P10] 4.6.2.5(20)- पृच्छत । इत् । उ । (GS-4.6-18)

पृच्छतेदित् पृच्छत पृच्छतेदु वु वित् पृच्छत पृच्छतेदु ।

(23)[P10] 4.6.2.5(21)- इत् । उ । तत् । (GD-46,GS-4.6-18)

इदु वु विदिदु तत् तदु विदिदु तत् ।

(24)[P10] 4.6.2.5(22)- उ । तत् । यत् । (GD-46,GS-4.6-18)

उ तत् तदू तद् यद् यत् तदू तद् यत् ।

(25)[P10] 4.6.2.5(23)- तत् । यत् । अद्ध्यतिष्ठत् । (GD-46,GS-4.6-18)

तद् यद् यत् तत् तद् य दद्ध्यतिष्ठ दद्ध्यतिष्ठद् यत् तत् तद् यदद्ध्यतिष्ठत् ।

(26)[P10] 4.6.2.5(24)- यत् । अद्ध्यतिष्ठत् । भुवनानि । (GS-4.6-18)

य दद्ध्यतिष्ठ दद्ध्यतिष्ठद् यद् य दद्ध्यतिष्ठद् भुवनानि भुवना न्यद्ध्यतिष्ठद् यद् यदद्ध्यतिष्ठद् भुवनानि ।

(27)[P10] 4.6.2.5(25)- अद्ध्यतिष्ठत् । भुवनानि । धारयन्न् ॥

अद्ध्यतिष्ठद् भुवनानि भुवना न्यद्ध्यतिष्ठ दद्ध्यतिष्ठद् भुवनानि धारयन् धारयन् भुवना न्यद्ध्यतिष्ठ दद्ध्यतिष्ठद् भुवनानि धारयन्न् ।

(28)[P10] 4.6.2.5(25)- अद्ध्यतिष्ठत् ।

अद्ध्यतिष्ठदित्यधि - अतिष्ठत् ।

(29)[P10] 4.6.2.5(26)- भुवनानि । धारयन्न् ॥

भुवनानि धारयन् धारयन् भुवनानि भुवनानि धारयन्न् ।

(30)[P10] 4.6.2.5(27)- धारयन्न् ॥

धारयन्निति धारयन्न् ।

(31)[P10] 4.6.2.5(28)- या । ते । धामानि ।

या ते ते या या ते धामानि धामानि ते या या ते धामानि ।

(32)[P10] 4.6.2.5(29)- ते । धामानि । परमाणि ।

ते धामानि धामानि ते ते धामानि परमाणि परमाणि धामानि ते ते धामानि परमाणि ।

(33)[P10] 4.6.2.5(30)- धामानि । परमाणि । या ।

धामानि परमाणि परमाणि धामानि धामानि परमाणि या या परमाणि धामानि धामानि परमाणि या ।

(34)[P10] 4.6.2.5(31)- परमाणि । या । अवमा ।

परमाणि या या परमाणि परमाणि या ऽवमा ऽवमा या परमाणि परमाणि या ऽवमा ।

(35)[P10] 4.6.2.5(32)- या । अवमा । या ।

या ऽवमा ऽवमा या या ऽवमा या या ऽवमा या या ऽवमा या ।

(36)[P10] 4.6.2.5(33)- अवमा । या । मद्ध्यमा ।

अवमा या या ऽवमा ऽवमा या मद्ध्यमा मद्ध्यमा या ऽवमा ऽवमा या मद्ध्यमा ।

(37)[P10] 4.6.2.5(34)- या । मद्ध्यमा । विश्वकर्मन्न् ।

या मद्ध्यमा मद्ध्यमा या या मद्ध्यमा विश्वकर्मन्. विश्वकर्मन् मद्ध्यमा या या मद्ध्यमा विश्वकर्मन्न् ।

(38)[P10] 4.6.2.5(35)- मद्ध्यमा । विश्वकर्मन्न् । उत । (GS-4.6-19)

मद्ध्यमा विश्वकर्मन्. विश्वकर्मन् मद्ध्यमा मद्ध्यमा विश्वकर्मन् नुतोत विश्वकर्मन् मद्ध्यमा मद्ध्यमा विश्वकर्मन् नुत ।

(39)[P10] 4.6.2.5(36)- विश्वकर्मन्न् । उत । इमा ॥ (GS-4.6-19)

विश्वकर्मन् नुतोत विश्वकर्मन्. विश्वकर्मन् नुते मेमोत विश्वकर्मन्. विश्वकर्मन् नुते मा ।

(40)[P10] 4.6.2.5(36)- विश्वकर्मन्न् । (GS-4.6-19)

विश्वकर्मन्निति विश्व - कर्मन्न् ।

(41)[P10] 4.6.2.5(37)- उत । इमा ॥ (GS-4.6-19)

उते मेमो तोते मा ।

(42)[P10] 4.6.2.5(38)- इमा ॥ (GS-4.6-19)

इमेतीमा ।

(43)[P10] 4.6.2.5(39)- शिक्ष । सखिभ्यः । हविषि ।

शिक्षा सखिभ्यः सखिभ्यः शिक्ष शिक्षा सखिभ्यो हविषि हविषि सखिभ्यः शिक्ष शिक्षा सखिभ्यो हविषि ।

(44)[P10] 4.6.2.5(40)- सखिभ्यः । हविषि । स्वधावः ।

सखिभ्यो हविषि हविषि सखिभ्यः सखिभ्यो हविषि स्वधावः स्वधावो हविषि सखिभ्यः सखिभ्यो हविषि स्वधावः ।

(45)[P10] 4.6.2.5(40)- सखिभ्यः ।

सखिभ्य इति सखि - भ्यः ।

(46)[P10] 4.6.2.5(41)- हविषि । स्वधावः । स्वयम् ।

हविषि स्वधावः स्वधावो हविषि हविषि स्वधावः स्वय(गग्) स्वय(गग्) स्वधावो हविषि हविषि स्वधावः स्वयम् ।

(47)[P10] 4.6.2.5(42)- स्वधावः । स्वयम् । यजस्व ।

स्वधावः स्वय(गग्) स्वय(गग्) स्वधावः स्वधावः स्वयं ँयजस्व यजस्व स्वय(गग्) स्वधावः स्वधावः स्वयं ँयजस्व ।

(48)[P10] 4.6.2.5(42)- स्वधावः ।

स्वधाव इति स्वधा - वः ।

(49)[P10] 4.6.2.5(43)- स्वयम् । यजस्व । तनुवम् ।

स्वयं ँयजस्व यजस्व स्वय(गg्) स्वयं ँयजस्व तनुवम् तनुवं ँयजस्व स्वय(ग्ग्) स्वयं ँयजस्व तनुवम् ।

(50)[P10] 4.6.2.5(44)- यजस्व । तनुवम् । जुषाणः ॥

यजस्व तनुवम् तनुवं ँयजस्व यजस्व तनुवम् जुषाणो जुषाण स्तनुवं ँयजस्व यजस्व तनुवम् जुषाणः ।

(51)[P10] 4.6.2.5(45)- तनुवम् । जुषाणः ॥

तनुवम् जुषाणो जुषाण स्तनुवम् तनुवम् जुषाणः ।

(52)[P10] 4.6.2.5(46)- जुषाणः ॥

जुषाण इति जुषाणः ।

(53)[P10] 4.6.2.5(47)- वाचः । पतिम् । विश्वकर्माणम् ।

वाच स्पतिम् पतिं ँवाचो वाच स्पतिं ँविश्वकर्माणं ँविश्वकर्माणम् पतिं ँवाचो वाच स्पतिं ँविश्वकर्माणम् ।

(54)[P10] 4.6.2.5(48)- पतिम् । विश्वकर्माणम् । ऊतये ।

पतिं ँविश्वकर्माणं ँविश्वकर्माणम् पतिम् पतिं ँविश्वकर्माण मूतय ऊतये विश्वकर्माणम् पतिम् पतिं ँविश्वकर्माण मूतये ।

(55)[P10] 4.6.2.5(49)- विश्वकर्माणम् । ऊतये । मनोयुजम् ।

विश्वकर्माण मूतय ऊतये विश्वकर्माणं ँविश्वकर्माण मूतये मनोयुजम् मनोयुज मूतये विश्वकर्माणं ँविश्वकर्माण मूतये मनोयुजम् ।

(56)[P10] 4.6.2.5(49)- विश्वकर्माणम् ।

विश्वकर्माणमिति विश्व - कर्माणम् ।

(57)[P10] 4.6.2.5(50)- ऊतये । मनोयुजम् । वाजे ।

ऊतये मनोयुजम् मनोयुज मूतय ऊतये मनोयुजं ँवाजे वाजे मनोयुज मूतय ऊतये मनोयुजं ँवाजे ।

(1)[P11] 4.6.2.6(1)- मनोयुजम् । वाजे । अद्य ।

मनोयुजं ँवाजे वाजे मनोयुजम् मनोयुजं ँवाजे अद्याद्य वाजे मनोयुजम् मनोयुजं ँवाजे अद्य ।

(2)[P11] 4.6.2.6(1)- मनोयुजम् ।

मनोयुजमिति मनः - युजम् ।

(3)[P11] 4.6.2.6(2)- वाजे । अद्य । हुवेम ॥

वाजे अद्याद्य वाजे वाजे अद्या हुवेम हुवेमाद्य वाजे वाजे अद्या हुवेम ।

(4)[P11] 4.6.2.6(3)- अद्य । हुवेम ॥

अद्या हुवेम हुवेमा द्याद्या हुवेम ।

(5)[P11] 4.6.2.6(4)- हुवेम ॥

हुवेमेति हुवेम ।

(6)[P11] 4.6.2.6(5)- सः । नः । नेदिष्ठा ।

स नो नः स स नो नेदिष्ठा नेदिष्ठा नः स स नो नेदिष्ठा ।

(7)[P11] 4.6.2.6(6)- नः । नेदिष्ठा । हवनानि ।

नो नेदिष्ठा नेदिष्ठा नो नो नेदिष्ठा हवनानि हवनानि नेदिष्ठा नो नो नेदिष्ठा हवनानि ।

(8)[P11] 4.6.2.6(7)- नेदिष्ठा । हवनानि । जोषते ।

नेदिष्ठा हवनानि हवनानि नेदिष्ठा नेदिष्ठा हवनानि जोषते जोषते हवनानि नेदिष्ठा नेदिष्ठा हवनानि जोषते ।

(9)[P11] 4.6.2.6(8)- हवनानि । जोषते । विश्वशंभूः ।

हवनानि जोषते जोषते हवनानि हवनानि जोषते विश्वशंभूर् विश्वशंभूर् जोषते हवनानि हवनानि जोषते विश्वशंभूः ।

(10)[P11] 4.6.2.6(9)- जोषते । विश्वशंभूः । अवसे ।

जोषते विश्वशंभूर् विश्वशंभूर् जोषते जोषते विश्वशंभू रवसे ऽवसे विश्वशंभूर् जोषते जोषते विश्वशंभू रवसे ।

(11)[P11] 4.6.2.6(10)- विश्वशंभूः । अवसे । साधुकर्मा ॥

विश्वशंभू रवसे ऽवसे विश्वशंभूर् विश्वशंभू रवसे साधुकर्मा साधुकर्मा ऽवसे विश्वशंभूर् विश्वशंभू रवसे साधुकर्मा ।

(12)[P11] 4.6.2.6(10)- विश्वशंभूः ।

विश्वशंभूरिति विश्व – शंभूः ।

(13)[P11] 4.6.2.6(11)- अवसे । साधुकर्मा ॥

अवसे साधुकर्मा साधुकर्मा ऽवसे ऽवसे साधुकर्मा ।

(14)[P11] 4.6.2.6(12)- साधुकर्मा ॥

साधुकर्मेति साधु – कर्मा ।

(15)[P11] 4.6.2.6(13)- विश्वकर्मन्न् । हविषा । वावृधानः ।

विश्वकर्मन्. हविषा हविषा विश्वकर्मन्. विश्वकर्मन्. हविषा वावृधानो वावृधानो हविषा विश्वकर्मन्. विश्वकर्मन्. हविषा वावृधानः ।

(16)[P11] 4.6.2.6(13)- विश्वकर्मन् ।

विश्वकर्मन्निति विश्व - कर्मन् ।

(17)[P11] 4.6.2.6(14)- हविषा । वावृधानः । स्वयम् ।

हविषा वावृधानो वावृधानो हविषा हविषा वावृधानः स्वय(गग्) स्वयं ँवावृधानो हविषा हविषा वावृधानः स्वयम् ।

(18)[P11] 4.6.2.6(15)- वावृधानः । स्वयम् । यजस्व ।

वावृधानः स्वय(गग्) स्वयं ँवावृधानो वावृधानः स्वयं ँयजस्व यजस्व स्वयं ँवावृधानो वावृधानः स्वयं ँयजस्व ।

(19)[P11] 4.6.2.6(16)- स्वयम् । यजस्व । तनुवम् ।

स्वयं ँयजस्व यजस्व स्वय(गग्) स्वयं ँयजस्व तनुवम् तनुवं ँयजस्व स्वय(गग्) स्वयं ँयजस्व तनुवम् ।

(20)[P11] 4.6.2.6(17)- यजस्व । तनुवम् । जुषाणः ॥

यजस्व तनुवम् तनुवं ँयजस्व यजस्व तनुवम् जुषाणो जुषाण स्तनुवं ँयजस्व यजस्व तनुवम् जुषाणः ।

(21)[P11] 4.6.2.6(18)- तनुवम् । जुषाणः ॥

तनुवम् जुषाणो जुषाण स्तनुवम् तनुवम् जुषाणः ।

(22)[P11] 4.6.2.6(19)- जुषाणः ॥

जुषाण इति जुषाणः ।

(23)[P11] 4.6.2.6(20)- मुह्यन्तु । अन्ये । अभितः ।

मुह्य न्त्वन्ये अन्ये मुह्यन्तु मुह्यन्त्वन्ये अभितो अभितो अन्ये मुह्यन्तु मुह्यन्त्वन्ये अभितः ।

(24)[P11] 4.6.2.6(21)- अ॒न्ये । अ॒भितः॑ । स॒पत्नाः᳚ ।

अ॒न्ये अ॒भितो॑ अ॒भितो॑ अ॒न्ये अ॒न्ये अ॒भितः॑ स॒पत्नाः᳚ स॒पत्ना॑ अ॒भितो॑ अ॒न्ये अ॒न्ये अ॒भितः॑ स॒पत्नाः᳚ ।

(25)[P11] 4.6.2.6(22)- अ॒भितः॑ । स॒पत्नाः᳚ । इ॒ह ।

अ॒भितः॑ स॒पत्नाः᳚ स॒पत्ना॑ अ॒भितो॑ अ॒भितः॑ स॒पत्ना॑ इ॒हेह स॒पत्ना॑ अ॒भितो॑ अ॒भितः॑ स॒पत्ना॑ इ॒ह ।

(26)[P11] 4.6.2.6(23)- स॒पत्नाः᳚ । इ॒ह । अ॒स्माक᳚म् ।

स॒पत्ना॑ इ॒हेह स॒पत्नाः᳚ स॒पत्ना॑ इ॒हा स्माक॑ म॒स्माक॑ मि॒ह स॒पत्नाः᳚ स॒पत्ना॑ इ॒हा स्माक᳚म् ।

(27)[P11] 4.6.2.6(24)- इ॒ह । अ॒स्माक᳚म् । म॒घवा᳚ ।

इ॒हास्माक॑ म॒स्माक॑ मि॒हेहा स्माक॑म् म॒घवा॑ म॒घवा॒ ऽस्माक॑ मि॒हेहा स्माक॑म् म॒घवा᳚ ।

(28)[P11] 4.6.2.6(25)- अ॒स्माक᳚म् । म॒घवा᳚ । सू॒रिः ।

अ॒स्माक॑म् म॒घवा॑ म॒घवा॒ ऽस्माक॑ म॒स्माक॑म् म॒घवा॑ सू॒रिः सू॒रिर् म॒घवा॒ ऽस्माक॑ म॒स्माक॑म् म॒घवा॑ सू॒रिः ।

(29)[P11] 4.6.2.6(26)- म॒घवा᳚ । सू॒रिः । अ॒स्तु॒ ॥

म॒घवा॑ सू॒रिः सू॒रिर् म॒घवा॑ म॒घवा॑ सू॒रि र॑स्त्वस्तु सू॒रिर् म॒घवा॑ म॒घवा॑ सू॒रि र॑स्तु ।

(30)[P11] 4.6.2.6(26)- म॒घवा᳚ ।

म॒घवे॑ति म॒घ - वा॒ ।

(31)[P11] 4.6.2.6(27)- सू॒रिः । अ॒स्तु॒ ॥

सू॒रि र॑स्त्वस्तु सू॒रिः सू॒रि र॑स्तु ।

(32)[P11] 4.6.2.6(28)- अ॒स्तु॒ ॥

अ॒स्त्वित्य॑स्तु ।

(33)[P11] 4.6.2.6(29)- विश्वकर्मन्न् । हविषा । वर्द्धनेन ।

विश्वकर्मन्. हविषा हविषा विश्वकर्मन्. विश्वकर्मन्. हविषा वर्द्धनेन वर्द्धनेन हविषा विश्वकर्मन्. विश्वकर्मन्. हविषा वर्द्धनेन ।

(34)[P11] 4.6.2.6(29)- विश्वकर्मन्न् ।

विश्वकर्मन्निति विश्व - कर्मन्न् ।

(35)[P11] 4.6.2.6(30)- हविषा । वर्द्धनेन । त्रातारम् ।

हविषा वर्द्धनेन वर्द्धनेन हविषा हविषा वर्द्धनेन त्रातारम् त्रातारं ँवर्द्धनेन हविषा हविषा वर्द्धनेन त्रातारम् ।

(36)[P11] 4.6.2.6(31)- वर्द्धनेन । त्रातारम् । इन्द्रम् ।

वर्द्धनेन त्रातारम् त्रातारं ँवर्द्धनेन वर्द्धनेन त्रातार मिन्द्र मिन्द्रम् त्रातारं ँवर्द्धनेन वर्द्धनेन त्रातार मिन्द्रम् ।

(37)[P11] 4.6.2.6(32)- त्रातारम् । इन्द्रम् । अकृणोः ।

त्रातार मिन्द्र मिन्द्रम् त्रातारम् त्रातार मिन्द्र मकृणो रकृणो रिन्द्रम् त्रातारम् त्रातार मिन्द्र मकृणोः ।

(38)[P11] 4.6.2.6(33)- इन्द्रम् । अकृणोः । अवद्ध्यम् ॥

इन्द्र मकृणो रकृणो रिन्द्र मिन्द्र मकृणो रवद्ध्य मवद्ध्य मकृणो रिन्द्र मिन्द्र मकृणो रवद्ध्यम् ।

(39)[P11] 4.6.2.6(34)- अकृणोः । अवद्ध्यम् ॥

अकृणो रवद्ध्य मवद्ध्य मकृणो रकृणो रवद्ध्यम् ।

(40)[P11] 4.6.2.6(35)- अवद्ध्यम् ॥

अवद्ध्यमित्यवध्यम् ।

(41)[P11] 4.6.2.6(36)– तस्मै । विशः । सम् ।

तस्मै विशो विश स्तस्मै तस्मै विशः स(ग्म्) सं ँविश स्तस्मै तस्मै विशः सम् ।

(42)[P11] 4.6.2.6(37)– विशः । सम् । अनमन्त ।

विशः स(ग्म्) सं ँविशो विशः स मनमन्ता नमन्त सं ँविशो विशः स मनमन्त ।

(43)[P11] 4.6.2.6(38)– सम् । अनमन्त । पूर्वीः । (GS–4.6–21)

स मनमन्ता नमन्त स(ग्म्) स मनमन्त पूर्वीः पूर्वी रनमन्त स(ग्म्) स मनमन्त पूर्वीः ।

(44)[P11] 4.6.2.6(39)– अनमन्त । पूर्वीः । अयम् । (GS–4.6–21)

अनमन्त पूर्वीः पूर्वी रनमन्ता नमन्त पूर्वी रय मयम् पूर्वी रनमन्ता नमन्त पूर्वीरयम् ।

(45)[P11] 4.6.2.6(40)– पूर्वीः । अयम् । उग्रः । (GS–4.6–21)

पूर्वी रय मयम् पूर्वीः पूर्वीरय मुग्र उग्रो ऽयम् पूर्वीः पूर्वीरय मुग्रः ।

(46)[P11] 4.6.2.6(41)– अयम् । उग्रः । विहव्यः । (GS–4.6–21)

अय मुग्र उग्रो ऽय मय मुग्रो विहव्यो विहव्य उग्रो ऽय मय मुग्रो विहव्यः ।

(47)[P11] 4.6.2.6(42)– उग्रः । विहव्यः । यथा । (GS–4.6–21)

उग्रो विहव्यो विहव्य उग्र उग्रो विहव्यो यथा यथा विहव्य उग्र उग्रो विहव्यो यथा ।

(48)[P11] 4.6.2.6(43)– विहव्यः । यथा । असत् ॥ (GS–4.6–21)

विहव्यो यथा यथा विहव्यो विहव्यो यथा ऽस दसद् यथा विहव्यो विहव्यो यथा ऽसत् ।

(49)[P11] 4.6.2.6(43)– विहव्यः । (GS–4.6–21)

विहव्य इति वि – हव्यः ।

(50)[P11] 4.6.2.6(44)– यथा । असत् ॥

यथा ऽस दसद् यथा यथा ऽसत् ।

(51)[P11] 4.6.2.6(45)- असत् ॥

असदित्यसत् ।

(52)[P11] 4.6.2.6(46)- समुद्राय । वयुनाय । सिन्धूनाम् ।

समुद्राय वयुनाय वयुनाय समुद्राय समुद्राय वयुनाय सिन्धूना(ग्म्) सिन्धूनां ँवयुनाय समुद्राय समुद्राय वयुनाय सिन्धूनाम् ।

(53)[P11] 4.6.2.6(47)- वयुनाय । सिन्धूनाम् । पतये ।

वयुनाय सिन्धूना(ग्म्) सिन्धूनां ँवयुनाय वयुनाय सिन्धूनाम् पतये पतये सिन्धूनां ँवयुनाय वयुनाय सिन्धूनाम् पतये ।

(54)[P11] 4.6.2.6(48)- सिन्धूनाम् । पतये । नमः ॥ (GS-4.6-20)

सिन्धूनाम् पतये पतये सिन्धूना(ग्म्) सिन्धूनाम् पतये नमो नम स्पतये सिन्धूना(ग्म्) सिन्धूनाम् पतये नमः ।

(55)[P11] 4.6.2.6(49)- पतये । नमः ॥ (GS-4.6-20)

पतये नमो नम स्पतये पतये नमः ।

(56)[P11] 4.6.2.6(50)- नमः ॥ (GS-4.6-20)

नम इति नमः ।

(57)[P11] 4.6.2.6(51)- नदीनाम् । सर्वासाम् । पित्रे ।

नदीना(ग्म्) सर्वासा(ग्म्) सर्वासाम् नदीनाम् नदीना(ग्म्) सर्वासाम् पित्रे पित्रे सर्वासाम् नदीनाम् नदीना(ग्म्) सर्वासाम् पित्रे ।

(58)[P11] 4.6.2.6(52)- सर्वासाम् । पित्रे । जुहुत ।

सर्वासाम् पित्रे पित्रे सर्वासा(ग्म्) सर्वासाम् पित्रे जुहुत जुहुत पित्रे सर्वासा(ग्म्) सर्वासाम् पित्रे जुहुत ।

(59)[P11] 4.6.2.6(53)- पित्रे । जुहुत । विश्वकर्मणे ।

पित्रे जुहुत जुहुत पित्रे पित्रे जुहुता विश्वकर्मणे विश्वकर्मणे जुहुत पित्रे पित्रे जुहुता विश्वकर्मणे ।

(60)[P11] 4.6.2.6(54)- जुहुत । विश्वकर्मणे । विश्वा । (GS-4.6-22)

जुहुता विश्वकर्मणे विश्वकर्मणे जुहुत जुहुता विश्वकर्मणे विश्वा विश्वा विश्वकर्मणे जुहुत जुहुता विश्वकर्मणे विश्वा ।

(61)[P11] 4.6.2.6(55)- विश्वकर्मणे । विश्वा । अहा । (GS-4.6-22)

विश्वकर्मणे विश्वा विश्वा विश्वकर्मणे विश्वकर्मणे विश्वा ऽहा ऽहा विश्वा विश्वकर्मणे विश्वकर्मणे विश्वा ऽहा ।

(62)[P11] 4.6.2.6(55)- विश्वकर्मणे । (GS-4.6-22)

विश्वकर्मण इति विश्व - कर्मणे ।

(63)[P11] 4.6.2.6(56)- विश्वा । अहा । अमर्त्यम् । (GS-4.6-22)

विश्वा ऽहा ऽहा विश्वा विश्वा ऽहा ऽमर्त्य ममर्त्य महा विश्वा विश्वा ऽहा ऽमर्त्यम् ।

(64)[P11] 4.6.2.6(57)- अहा । अमर्त्यम् । हविः ॥ (GS-4.6-22)

अहा ऽमर्त्य ममर्त्य महा ऽहा ऽमर्त्य(ग्म्) हविर्. हवि रमर्त्य महा ऽहा ऽमर्त्य(ग्म्) हविः ।

(65)[P11] 4.6.2.6(58)- अमर्त्यम् । हविः ॥ (GS-4.6-22)

अमर्त्य(ग्म्) हविर्. हवि रमर्त्य ममर्त्य(ग्म्) हविः ।

(66)[P11] 4.6.2.6(59)- हविः ॥

हविरिति हविः ।

=========

## 4.6.3 अनुवाकम् 3 – घनम्

(1)[P12] 4.6.3.1(1)- उत् । ए॒न॒म् । उ॒त्त॒राम् । (GS−4.6−23)

उ॑देन मे॑न॒ मुदु॒दे॑न मुत्त॒रा मु॑त्त॒रा मे॑न॒ मुदु॒दे॑न मुत्त॒राम् ।

(2)[P12] 4.6.3.1(2)- ए॒न॒म् । उ॒त्त॒राम् । न॒य॒ । (GS−4.6−23)

ए॒न॒ मु॒त्त॒रा मु॑त्त॒रा मे॑न मेन मुत्त॒राम् न॑य नयो॑त्त॒रा मे॑न मेन मुत्त॒राम् न॑य ।

(3)[P12] 4.6.3.1(3)- उ॒त्त॒राम् । न॒य॒ । अग्ने᳚ । (GS−4.6−23)

उ॒त्त॒राम् न॑य नयो॒त्त॒रा मु॑त्त॒राम् न॒याग्ने ऽग्ने॑ नयो॒त्त॒रा मु॑त्त॒राम् न॒याग्ने᳚ ।

(4)[P12] 4.6.3.1(3)- उ॒त्त॒राम् । (GS−4.6−23)

उ॒त्त॒रामि॑त्युत् - त॒राम् ।

(5)[P12] 4.6.3.1(4)- न॒य॒ । अग्ने᳚ । घृ॒ते॒न॒ । (GS−4.6−23)

न॒याग्ने ऽग्ने॑ नय न॒याग्ने॑ घृतेन घृ॒तेना᳚ग्ने॑ नय न॒याग्ने॑ घृतेन ।

(6)[P12] 4.6.3.1(5)- अग्ने᳚ । घृ॒ते॒न॒ । आ॒हु॒त॒ ॥ (GS−4.6−23)

अग्ने॑ घृतेन घृ॒तेनाग्ने ऽग्ने॑ घृते नाहुता हुत घृ॒तेनाग्ने ऽग्ने॑ घृतेनाहुत ।

(7)[P12] 4.6.3.1(6)- घृ॒ते॒न॒ । आ॒हु॒त॒ ॥ (GS−4.6−23)

घृ॒ते॒ ना॒हु॒ता॒ हु॒त॒ घृ॒ते॒न॒ घृ॒ते॒ ना॒हु॒त॒ ।

(8)[P12] 4.6.3.1(7)- आ॒हु॒त॒ ॥ (GS−4.6−23)

आ॒हु॒तेत्या᳚ - हु॒त॒ ।

(9)[P12] 4.6.3.1(8)- रा॒यः । पोषे॑ण । सम् ।

रा॒य स्पोषे॑ण॒ पोषे॑ण रा॒यो रा॒य स्पोषे॑ण॒ स(ग्म्) सम् पोषे॑ण रा॒यो रा॒य स्पोषे॑ण॒ सम् ।

(10)[P12] 4.6.3.1(9)- पोषे॑ण । सम् । सृ॒ज॒ ।

पोषे॑ण॒ स(ग्म्) सम् पोषे॑ण॒ पोषे॑ण॒ स(ग्म्) सृ॑ज सृज॒ सम् पोषे॑ण॒ पोषे॑ण॒ स(ग्म्) सृ॑ज ।

(11)[P12] 4.6.3.1(10)- सम् । सृज । प्रजया ।

स(ग्म्) सृज सृज स(ग्म्) स(ग्म्) सृज प्रजया प्रजया सृज स(ग्म्) स(ग्म्) सृज प्रजया ।

(12)[P12] 4.6.3.1(11)- सृज । प्रजया । च ।

सृज प्रजया प्रजया सृज सृज प्रजया च च प्रजया सृज सृज प्रजया च ।

(13)[P12] 4.6.3.1(12)- प्रजया । च । धनेन ।

प्रजया च च प्रजया प्रजया च धनेन धनेन च प्रजया प्रजया च धनेन ।

(14)[P12] 4.6.3.1(12)- प्रजया ।

प्रजयेति प्र - जया ।

(15)[P12] 4.6.3.1(13)- च । धनेन । च ॥

च धनेन धनेन च च धनेन च च धनेन च च धनेन च ।

(16)[P12] 4.6.3.1(14)- धनेन । च ॥

धनेन च च धनेन धनेन च ।

(17)[P12] 4.6.3.1(15)- च ॥

चेति च ।

(18)[P12] 4.6.3.1(16)- इन्द्र । इमम् । प्रतराम् ।

इन्द्रेम मिम मिन्द्रेन्द्रे मम् प्रतराम् प्रतरा मिम मिन्द्रेन्द्रे मम् प्रतराम् ।

(19)[P12] 4.6.3.1(17)- इमम् । प्रतराम् । कृधि ।

इमम् प्रतराम् प्रतरा मिम मिमम् प्रतराम् कृधि कृधि प्रतरा मिम मिमम् प्रतराम् कृधि ।

(20)[P12] 4.6.3.1(18)- प्रतराम् । कृधि । सजातानाम् ।

प्रतराम् कृधि कृधि प्रतराम् प्रतराम् कृधि सजाताना(ग्म्) सजातानाम् कृधि प्रतराम् प्रतराम् कृधि सजातानाम् ।

(21)[P12] 4.6.3.1(18)- प्रतराम् ।

प्रतरामिति प्र - तराम् ।

(22)[P12] 4.6.3.1(19)- कृधि । सजातानाम् । असत् ।

कृधि सजाताना(ग्म्) सजातानाम् कृधि कृधि सजाताना मस दसथ् सजातानाम् कृधि कृधि सजाताना मसत् ।

(23)[P12] 4.6.3.1(20)- सजातानाम् । असत् । वशी ॥

सजाताना मस दसथ् सजाताना(ग्म्) सजाताना मसद् वशी वश्यसथ् सजाताना(ग्म्) सजाताना मसद् वशी ।

(24)[P12] 4.6.3.1(20)- सजातानाम् ।

सजातानामिति स - जातानाम् ।

(25)[P12] 4.6.3.1(21)- असत् । वशी ॥

असद् वशी वश्य सदसद् वशी ।

(26)[P12] 4.6.3.1(22)- वशी ॥

वशीति वशी ।

(27)[P12] 4.6.3.1(23)- सम् । एनम् । वर्चसा ।

स मेन मेन(ग्म्) स(ग्म्) स मेनं ँवर्चसा वर्चसैन(ग्म्) स(ग्म्) स मेनं ँवर्चसा ।

(28)[P12] 4.6.3.1(24)- एनम् । वर्चसा । सृज ।

एनं ँवर्चसा वर्चसैन मेनं ँवर्चसा सृज सृज वर्च सैन मेनं ँवर्चसा सृज ।

(29)[P12] 4.6.3.1(25)- वर्चसा । सृज । देवेभ्यः ।

वर्चसा सृज सृज वर्चसा वर्चसा सृज देवेभ्यो देवेभ्यः सृज वर्चसा वर्चसा सृज देवेभ्यः ।

(30)[P12] 4.6.3.1(26)- सृज । देवेभ्यः । भागधाः ।

सृज देवेभ्यो देवेभ्यः सृज सृज देवेभ्यो भागधा भागधा देवेभ्यः सृज सृज देवेभ्यो भागधाः ।

(31)[P12] 4.6.3.1(27)- देवेभ्यः । भागधाः । असत् ॥

देवेभ्यो भागधा भागधा देवेभ्यो देवेभ्यो भागधा अस दसद् भागधा देवेभ्यो देवेभ्यो भागधा असत् ।

(32)[P12] 4.6.3.1(28)- भागधाः । असत् ॥

भागधा अस दसद् भागधा भागधा असत् ।

(33)[P12] 4.6.3.1(28)- भागधाः ।

भागधा इति भाग - धाः ।

(34)[P12] 4.6.3.1(29)- असत् ॥

असदित्यसत् ।

(35)[P12] 4.6.3.1(30)- यस्य । कुर्मः । हविः ।

यस्य कुर्मः कुर्मो यस्य यस्य कुर्मो हविर्. हविः कुर्मो यस्य यस्य कुर्मो हविः ।

(36)[P12] 4.6.3.1(31)- कुर्मः । हविः । गृहे ।

कुर्मो हविर्. हविः कुर्मः कुर्मो हविर् गृहे गृहे हविः कुर्मः कुर्मो हविर् गृहे ।

(37)[P12] 4.6.3.1(32)- हविः । गृहे । तम् ।

हविर् गृहे गृहे हविर्. हविर् गृहे तम् तम् गृहे हविर्. हविर् गृहे तम् ।

(38)[P12] 4.6.3.1(33)- गृहे । तम् । अग्ने ।

गृहे तम् तम् गृहे गृहेत मग्ने अग्ने तम् गृहे गृहेत मग्ने ।

(39)[P12] 4.6.3.1(34)- तम् । अग्ने । वर्द्धय ।

त मग्ने अग्ने तम् त मग्ने वर्द्धय वर्द्धयाग्ने तम् त मग्ने वर्द्धय ।

(40)[P12] 4.6.3.1(35)- अग्ने । वर्द्धय । त्वम् ॥

अग्ने वर्द्धय वर्द्ध याग्ने अग्ने वर्द्धया त्वम् त्वं वर्द्ध याग्ने अग्ने वर्द्धया त्वम् ।

(41)[P12] 4.6.3.1(36)- वर्द्धय । त्वम् ॥

वर्द्धया त्वम् त्वं वर्द्धय वर्द्धया त्वम् ।

(42)[P12] 4.6.3.1(37)- त्वम् ॥

त्वमिति त्वम् ।

(43)[P12] 4.6.3.1(38)- तस्मै । देवाः । अधि ।

तस्मै देवा देवा स्तस्मै तस्मै देवा अध्यधि देवा स्तस्मै तस्मै देवा अधि ।

(44)[P12] 4.6.3.1(39)- देवाः । अधि । ब्रवन्न् ।

देवा अध्यधि देवा देवा अधि ब्रवन् ब्रवन् नधि देवा देवा अधि ब्रवन्न् ।

(45)[P12] 4.6.3.1(40)- अधि । ब्रवन्न् । अयम् ।

अधि ब्रवन् ब्रवन् नध्यधि ब्रवन् नय मयम् ब्रवन् नध्यधि ब्रवन् नयम् ।

(46)[P12] 4.6.3.1(41)- ब्रवन्न् । अयम् । च ।

ब्रवन् नय मयम् ब्रवन् ब्रवन् नयम् च चायम् ब्रवन् ब्रवन् नयम् च ।

(47)[P12] 4.6.3.1(42)- अयम् । च । ब्रह्मणः ।

अयम् च चाय मयम् च ब्रह्मणो ब्रह्मण श्चाय मयम् च ब्रह्मणः ।

(48)[P12] 4.6.3.1(43)- च । ब्रह्मणः । पतिः ॥

च ब्रह्मणो ब्रह्मणश्च च ब्रह्मण स्पतिष् पतिर् ब्रह्मणश्च च ब्रह्मण स्पतिः ।

(49)[P12] 4.6.3.1(44)- ब्रह्मणः । पतिः ॥

ब्रह्मण स्पतिष् पतिर् ब्रह्मणो ब्रह्मण स्पतिः ।

(50)[P12] 4.6.3.1(45)- पतिः ॥

पतिरिति पतिः ।

(51)[P12] 4.6.3.1(46)- उत् । उ । त्वा । (GS-4.6-24)

उदु वु वुदुदु त्वा त्व वुदुदु त्वा ।

(52)[P12] 4.6.3.1(47)- उ । त्वा । विश्वे । (GS-4.6-24)

उ त्वा त्व वु त्वा विश्वे विश्वे त्व वु त्वा विश्वे ।

(53)[P12] 4.6.3.1(48)- त्वा । विश्वे । देवाः । (GS-4.6-24)

त्वा विश्वे विश्वे त्वा त्वा विश्वे देवा देवा विश्वे त्वा त्वा विश्वे देवाः ।

(54)[P12] 4.6.3.1(49)- विश्वे । देवाः । अग्ने । (GS-4.6-24)

विश्वे देवा देवा विश्वे विश्वे देवा अग्ने ऽग्ने देवा विश्वे विश्वे देवा अग्ने ।

(55)[P12] 4.6.3.1(50)- देवाः । अग्ने । भरन्तु । (GS-4.6-24)

देवा अग्ने ऽग्ने देवा देवा अग्ने भरन्तु भरन्त्वग्ने देवा देवा अग्ने भरन्तु ।

(1)[P13] 4.6.3.2(1)- अग्ने । भरन्तु । चित्तिभिः ॥ (GS-4.6-24)

अग्ने भरन्तु भरन्त्वग्ने ऽग्ने भरन्तु चित्तिभि श्चित्तिभिर् भरन्त्वग्ने ऽग्ने भरन्तु चित्तिभिः ।

(2)[P13] 4.6.3.2(2)- भरन्तु । चित्तिभिः ॥

भरन्तु चित्तिभि श्चित्तिभिर् भरन्तु भरन्तु चित्तिभिः ।

(3)[P13] 4.6.3.2(3)- चित्तिभिः ॥

चित्तिभिरिति चित्ति - भिः ।

(4)[P13] 4.6.3.2(4)- सः । नः । भव ।

स नो नः स स नो भव भव नः स स नो भव ।

(5)[P13] 4.6.3.2(5)- नः । भव । शिवतमः ।

नो भव भव नो नो भव शिवतमः शिवतमो भव नो नो भव शिवतमः ।

(6)[P13] 4.6.3.2(6)- भव । शिवतमः । सुप्रतीकः ।

भव शिवतमः शिवतमो भव भव शिवतमः सुप्रतीकः सुप्रतीकः शिवतमो भव भव शिवतमः सुप्रतीकः ।

(7)[P13] 4.6.3.2(7)- शिवतमः । सुप्रतीकः । विभावसुः ॥

शिवतमः सुप्रतीकः सुप्रतीकः शिवतमः शिवतमः सुप्रतीको विभावसुर् विभावसुः सुप्रतीकः शिवतमः शिवतमः सुप्रतीको विभावसुः ।

(8)[P13] 4.6.3.2(7)- शिवतमः ।

शिवतम इति शिव - तमः ।

(9)[P13] 4.6.3.2(8)- सुप्रतीकः । विभावसुः ॥

सुप्रतीको विभावसुर् विभावसुः सुप्रतीकः सुप्रतीको विभावसुः ।

(10)[P13] 4.6.3.2(8)- सुप्रतीकः ।

सुप्रतीक इति सु - प्रतीकः ।

(11)[P13] 4.6.3.2(9)- विभावसुः ॥

विभावसुरिति विभा - वसुः ।

(12)[P13] 4.6.3.2(10)- पञ्च । दिशः । दैवीः ।

पञ्च दिशो दिशः पञ्च पञ्च दिशो दैवीर् दैवीर् दिशः पञ्च पञ्च दिशो दैवीः ।

(13)[P13] 4.6.3.2(11)- दिशः । दैवीः । यज्ञम् ।

दिशो दैवीर् दैवीर् दिशो दिशो दैवीर् यज्ञं ँयज्ञम् दैवीर् दिशो दिशो दैवीर् यज्ञम् ।

(14)[P13] 4.6.3.2(12)- दैवीः । यज्ञम् । अवन्तु ।

दैवीर् यज्ञं ँयज्ञम् दैवीर् दैवीर् यज्ञ मवन्त्ववन्तु यज्ञम् दैवीर् दैवीर् यज्ञ मवन्तु ।

(15)[P13] 4.6.3.2(13)- यज्ञम् । अवन्तु । देवीः ।

यज्ञ मवन्त्ववन्तु यज्ञं ँयज्ञ मवन्तु देवीर् देवी रवन्तु यज्ञं ँयज्ञ मवन्तु देवीः ।

(16)[P13] 4.6.3.2(14)- अवन्तु । देवीः । अप ।

अवन्तु देवीर् देवी रवन् त्ववन्तु देवी रपाप देवी रवन् त्ववन्तु देवीरप ।

(17)[P13] 4.6.3.2(15)- देवीः । अप । अमतिम् ।

देवी रपाप देवीर् देवी रपा मति ममति मप देवीर् देवी रपा मतिम् ।

(18)[P13] 4.6.3.2(16)- अप । अमतिम् । दुर्मतिम् ।

अपामति ममति मपा पा मतिम् दुर्मतिम् दुर्मति ममति मपा पामतिम् दुर्मतिम् ।

(19)[P13] 4.6.3.2(17)- अमतिम् । दुर्मतिम् । बाधमानाः ॥

अमतिम् दुर्मतिम् दुर्मति ममति ममतिम् दुर्मतिम् बाधमाना बाधमाना दुर्मति ममति ममतिम् दुर्मतिम् बाधमानाः ।

(20)[P13] 4.6.3.2(18)- दुर्मतिम् । बाधमानाः ॥

दुर्मतिम् बाधमाना बाधमाना दुर्मतिम् दुर्मतिम् बाधमानाः ।

(21)[P13] 4.6.3.2(18)- दुर्मतिम् ।

दुर्मतिमिति दुः – मतिम् ।

(22)[P13] 4.6.3.2(19)- बाधमानाः ॥

बाधमाना इति बाधमानाः ।

(23)[P13] 4.6.3.2(20)- रायः । पोषे । यज्ञपतिम् ।

राय स्पोषे पोषे रायो राय स्पोषे यज्ञपतिं ँयज्ञपतिम् पोषे रायो राय स्पोषे यज्ञपतिम् ।

(24)[P13] 4.6.3.2(21)- पोषे । यज्ञपतिम् । आभजन्तीः ॥

पोषे यज्ञपतिं ँयज्ञपतिम् पोषे पोषे यज्ञपति माभजन्ती राभजन्तीर् यज्ञपतिम् पोषे पोषे यज्ञपति माभजन्तीः ।

(25)[P13] 4.6.3.2(22)- यज्ञपतिम् । आभजन्तीः ॥

यज्ञपति माभजन्ती राभजन्तीर् यज्ञपतिं ँयज्ञपति माभजन्तीः ।

(26)[P13] 4.6.3.2(22)- यज्ञपतिम् ।

यज्ञपतिमिति यज्ञ - पतिम् ।

(27)[P13] 4.6.3.2(23)- आभजन्तीः ॥

आभजन्तीरित्या - भजन्तीः ।

(28)[P13] 4.6.3.2(24)- रायः । पोषे । अधि ।

राय स्पोषे पोषे रायो राय स्पोषे अध्यधि पोषे रायो राय स्पोषे अधि ।

(29)[P13] 4.6.3.2(25)- पोषे । अधि । यज्ञः ।

पोषे अध्यधि पोषे पोषे अधि यज्ञो यज्ञो अधि पोषे पोषे अधि यज्ञः ।

(30)[P13] 4.6.3.2(26)- अधि । यज्ञः । अस्थात् ।

अधि यज्ञो यज्ञो अध्यधि यज्ञो अस्था दस्थाद् यज्ञो अध्यधि यज्ञो अस्थात् ।

(31)[P13] 4.6.3.2(27)- यज्ञः । अस्थात् । समिद्धे ।

यज्ञो अस्था दस्थाद् यज्ञो यज्ञो अस्थाथ् समिद्धे समिद्धे अस्थाद् यज्ञो यज्ञो अस्थाथ् समिद्धे ।

(32)[P13] 4.6.3.2(28)- अस्थात् । समिद्धे । अग्नौ ।

अस्थाथ् समिद्धे समिद्धे अस्था दस्थाथ् समिद्धे अग्ना वग्नौ समिद्धे अस्था दस्थाथ् समिद्धे अग्नौ ।

(33)[P13] 4.6.3.2(29)- समिद्धे । अग्नौ । अधि ।

समिद्धे अग्ना वग्नौ समिद्धे समिद्धे अग्ना वध्य ध्यग्नौ समिद्धे समिद्धे अग्ना वधि ।

(34)[P13] 4.6.3.2(29)- समिद्धे ।

समिद्ध इति सं - इद्धे ।

(35)[P13] 4.6.3.2(30)- अग्नौ । अधि । मामहानः ॥

अग्ना वध्य ध्यग्ना वग्ना वधि मामहानो मामहानो अध्यग्ना वग्ना वधि मामहानः ।

(36)[P13] 4.6.3.2(31)- अधि । मामहानः ॥

अधि मामहानो मामहानो अध्यधि मामहानः ।

(37)[P13] 4.6.3.2(32)- मामहानः ॥

मामहान इति मामहानः ।

(38)[P13] 4.6.3.2(33)- उक्थपत्रः । ईड्यः । गृभीतः ।

उक्थपत्र ईड्य ईड्य उक्थपत्र उक्थपत्र ईड्यो गृभीतो गृभीत ईड्य उक्थपत्र उक्थपत्र ईड्यो गृभीतः ।

(39)[P13] 4.6.3.2(33)- उक्थपत्रः ।

उक्थपत्र इत्युक्थ - पत्रः ।

(40)[P13] 4.6.3.2(34)- ईड्यः । गृभीतः । तप्तम् ।

ईड्यो गृभीतो गृभीत ईड्य ईड्यो गृभीत स्तप्तम् तप्तम् गृभीत ईड्य ईड्यो गृभीत स्तप्तम् ।

(41)[P13] 4.6.3.2(35)- गृभीतः । तप्तम् । घर्मम् ।

गृभीत स्तप्तम् तप्तम् गृभीतो गृभित स्तप्तम् घर्मम् घर्मम् तप्तम् गृभीतो गृभित स्तप्तम् घर्मम् ।

(42)[P13] 4.6.3.2(36)- तप्तम् । घर्मम् । परिगृह्य ।

तप्तम् घर्मम् घर्मम् तप्तम् तप्तम् घर्मम् परिगृह्य परिगृह्य घर्मम् तप्तम् तप्तम् घर्मम् परिगृह्य ।

(43)[P13] 4.6.3.2(37)- घर्मम् । परिगृह्य । अयजन्त ॥

घर्मम् परिगृह्य परिगृह्य घर्मम् घर्मम् परिगृह्या यजन्ता यजन्त परिगृह्य घर्मम् घर्मम् परिगृह्या यजन्त ।

(44)[P13] 4.6.3.2(38)- परिगृह्य । अयजन्त ॥

परिगृह्या यजन्ता यजन्त परिगृह्य परिगृह्या यजन्त ।

(45)[P13] 4.6.3.2(38)- परिगृह्य ।

परिगृह्येति परि - गृह्य ।

(46)[P13] 4.6.3.2(39)- अयजन्त ॥

अयजन्तेत्ययजन्त ।

(47)[P13] 4.6.3.2(40)- ऊर्जा । यत् । यज्ञम् ।

ऊर्जा यद् यदूर्जोर्जा यद् यज्ञं ँयज्ञं ँयदूर्जोर्जा यद् यज्ञम् ।

(48)[P13] 4.6.3.2(41)- यत् । यज्ञम् । अशमन्त ।

यद् यज्ञं ँयज्ञं ँयद् यद् यज्ञ मशमन्ता शमन्त यज्ञं ँयद् यद् यज्ञ मशमन्त ।

(49)[P13] 4.6.3.2(42)- यज्ञम् । अशमन्त । देवाः ।

यज्ञ मशमन्ता शमन्त यज्ञं ँयज्ञ मशमन्त देवा देवा अशमन्त यज्ञं ँयज्ञ मशमन्त देवाः ।

(50)[P13] 4.6.3.2(43)– अशमन्त । देवाः । दैव्याय ।

अशमन्त देवा देवा अशमन्ता शमन्त देवा दैव्याय दैव्याय देवा अशमन्ता शमन्त देवा दैव्याय ।

(51)[P13] 4.6.3.2(44)– देवाः । दैव्याय । धर्त्रे ।

देवा दैव्याय दैव्याय देवा देवा दैव्याय धर्त्रे धर्त्रे दैव्याय देवा देवा दैव्याय धर्त्रे ।

(52)[P13] 4.6.3.2(45)– दैव्याय । धर्त्रे । जोष्ट्रे ॥

दैव्याय धर्त्रे धर्त्रे दैव्याय दैव्याय धर्त्रे जोष्ट्रे जोष्ट्रे धर्त्रे दैव्याय दैव्याय धर्त्रे जोष्ट्रे ।

(53)[P13] 4.6.3.2(46)– धर्त्रे । जोष्ट्रे ॥

धर्त्रे जोष्ट्रे जोष्ट्रे धर्त्रे धर्त्रे जोष्ट्रे ।

(54)[P13] 4.6.3.2(47)– जोष्ट्रे ॥

जोष्ट्र इति जोष्ट्रे ।

(55)[P13] 4.6.3.2(48)– देवश्रीः । श्रीमणाः । शतपयाः ।

देवश्रीः श्रीमणाः श्रीमणा देवश्रीर् देवश्रीः श्रीमणाः शतपयाः शतपयाः श्रीमणा देवश्रीर् देवश्रीः श्रीमणाः शतपयाः ।

(56)[P13] 4.6.3.2(48)– देवश्रीः ।

देवश्रीरिति देव – श्रीः ।

(57)[P13] 4.6.3.2(49)– श्रीमणाः । शतपयाः । परिगृह्य ।

श्रीमणाः शतपयाः शतपयाः श्रीमणाः श्रीमणाः शतपयाः परिगृह्य परिगृह्य शतपयाः श्रीमणाः श्रीमणाः शतपयाः परिगृह्य ।

(58)[P13] 4.6.3.2(49)– श्रीमणाः ।

श्रीमणा इति श्री – मनाः ।

(59)[P13] 4.6.3.2(50)- शतपयाः । परिगृह्य । देवाः ।

शतपयाः परिगृह्य परिगृह्य शतपयाः शतपयाः परिगृह्य देवा देवाः परिगृह्य शतपयाः शतपयाः परिगृह्य देवाः ।

(60)[P13] 4.6.3.2(50)- शतपयाः ।

शतपया इति शत - पयाः ।

(1)[P14] 4.6.3.3(1)- परिगृह्य । देवाः । यज्ञम् ।

परिगृह्य देवा देवाः परिगृह्य परिगृह्य देवा यज्ञं ँयज्ञम् देवाः परिगृह्य परिगृह्य देवा यज्ञम् ।

(2)[P14] 4.6.3.3(1)- परिगृह्य ।

परिगृह्येति परि - गृह्य ।

(3)[P14] 4.6.3.3(2)- देवाः । यज्ञम् । आयन्न् ॥

देवा यज्ञं ँयज्ञम् देवा देवा यज्ञ मायन् नायन्. यज्ञम् देवा देवा यज्ञ मायन्न् ।

(4)[P14] 4.6.3.3(3)- यज्ञम् । आयन्न् ॥

यज्ञ मायन् नायन्. यज्ञं ँयज्ञ मायन्न् ।

(5)[P14] 4.6.3.3(4)- आयन्न् ॥

आयन्नित्यायन्न् ।

(6)[P14] 4.6.3.3(5)- सूर्यरश्मिः । हरिकेशः । पुरस्तात् ।

सूर्यरश्मिर्. हरिकेशो हरिकेशः सूर्यरश्मिः सूर्यरश्मिर्. हरिकेशः पुरस्तात् पुरस्ता द्धरिकेशः सूर्यरश्मिः सूर्यरश्मिर्. हरिकेशः पुरस्तात् ।

(7)[P14] 4.6.3.3(5)- सूर्यरश्मिः ।

सूर्यरश्मिरिति सूर्य - रश्मिः ।

(8)[P14] 4.6.3.3(6)- हरिकेशः । पुरस्तात् । सविता ।

हरिकेशः पुरस्तात् पुरस्ता द्धरिकेशो हरिकेशः पुरस्ताथ् सविता सविता पुरस्ता द्धरिकेशो हरिकेशः पुरस्ताथ् सविता ।

(9)[P14] 4.6.3.3(6)- हरिकेशः ।

हरिकेश इति हरि - केशः ।

(10)[P14] 4.6.3.3(7)- पुरस्तात् । सविता । ज्योतिः ।

पुरस्ताथ् सविता सविता पुरस्तात् पुरस्ताथ् सविता ज्योतिर् ज्योतिः सविता पुरस्तात् पुरस्ताथ् सविता ज्योतिः ।

(11)[P14] 4.6.3.3(8)- सविता । ज्योतिः । उत् ।

सविता ज्योतिर् ज्योतिः सविता सविता ज्योति रुदुज् ज्योतिः सविता सविता ज्योतिरुत् ।

(12)[P14] 4.6.3.3(9)- ज्योतिः । उत् । अयान् । (GS-4.6-25)

ज्योति रुदुज् ज्योतिर् ज्योति रुदया(ग्म्) अया(ग्म्) उज् ज्योतिर् ज्योति रुदयान् ।

(13)[P14] 4.6.3.3(10)- उत् । अयान् । अजस्रम् ॥ (GS-4.6-25)

उदया(ग्म्) अया(ग्म्) उदुदया(ग्म्) अजस्र मजस्र मया(ग्म्) उदुदया(ग्म्) अजस्रम् ।

(14)[P14] 4.6.3.3(11)- अयान् । अजस्रम् ॥ (GS-4.6-25)

अया(ग्म्) अजस्र मजस्र मया(ग्म्) अया(ग्म्) अजस्रम् ।

(15)[P14] 4.6.3.3(12)- अजस्रम् ॥ (GS-4.6-25)

अजस्रमित्यजस्रम् ।

(16)[P14] 4.6.3.3(13)- तस्य । पूषा । प्रसवम् ।

तस्य पूषा पूषा तस्य तस्य पूषा प्रसवम् प्रसवम् पूषा तस्य तस्य पूषा प्रसवम् ।

(17)[P14] 4.6.3.3(14)- पूषा । प्रसवम् । याति ।

पूषा प्रसवम् प्रसवम् पूषा पूषा प्रसवं ँयाति याति प्रसवम् पूषा पूषा प्रसवं ँयाति ।

(18)[P14] 4.6.3.3(15)- प्रसवम् । याति । देवः ।

प्रसवं ँयाति याति प्रसवम् प्रसवं ँयाति देवो देवो याति प्रसवम् प्रसवं ँयाति देवः ।

(19)[P14] 4.6.3.3(15)- प्रसवम् ।

प्रसवमिति प्र - सवम् ।

(20)[P14] 4.6.3.3(16)- याति । देवः । संपश्यन्न् ।

याति देवो देवो याति याति देवः संपश्यन् थ्संपश्यन् देवो याति याति देवः संपश्यन्न् ।

(21)[P14] 4.6.3.3(17)- देवः । संपश्यन्न् । विश्वा ।

देवः संपश्यन् थ्संपश्यन् देवो देवः संपश्यन्. विश्वा विश्वा संपश्यन् देवो देवः संपश्यन्. विश्वा ।

(22)[P14] 4.6.3.3(18)- संपश्यन्न् । विश्वा । भुवनानि ।

संपश्यन्. विश्वा विश्वा संपश्यन् थ्संपश्यन्. विश्वा भुवनानि भुवनानि विश्वा संपश्यन् थ्संपश्यन्. विश्वा भुवनानि ।

(23)[P14] 4.6.3.3(18)- संपश्यन्न् ।

संपश्यन्निति सं - पश्यन्न् ।

(24)[P14] 4.6.3.3(19)- विश्वा । भुवनानि । गोपाः ॥

विश्वा भुवनानि भुवनानि विश्वा विश्वा भुवनानि गोपा गोपा भुवनानि विश्वा विश्वा भुवनानि गोपाः ।

(25)[P14] 4.6.3.3(20)- भुवनानि । गोपाः ॥

भुवनानि गोपा गोपा भुवनानि भुवनानि गोपाः ।

(26)[P14] 4.6.3.3(21)- गोपाः ॥

गोपा इति गो - पाः ।

(27)[P14] 4.6.3.3(22)- देवाः । देवेभ्यः । अद्ध्वर्यन्तः ।

देवा देवेभ्यो देवेभ्यो देवा देवा देवेभ्यो अद्ध्वर्यन्तो अद्ध्वर्यन्तो देवेभ्यो देवा देवा देवेभ्यो अद्ध्वर्यन्तः ।

(28)[P14] 4.6.3.3(23)- देवेभ्यः । अद्ध्वर्यन्तः । अस्थुः ।

देवेभ्यो अद्ध्वर्यन्तो अद्ध्वर्यन्तो देवेभ्यो देवेभ्यो अद्ध्वर्यन्तो अस्थु रस्थु रद्ध्वर्यन्तो देवेभ्यो देवेभ्यो अद्ध्वर्यन्तो अस्थुः ।

(29)[P14] 4.6.3.3(24)- अद्ध्वर्यन्तः । अस्थुः । वीतम् ।

अद्ध्वर्यन्तो अस्थु रस्थु रद्ध्वर्यन्तो अद्ध्वर्यन्तो अस्थुर् वीतं ँवीत मस्थु रद्ध्वर्यन्तो अद्ध्वर्यन्तो अस्थुर् वीतम् ।

(30)[P14] 4.6.3.3(25)- अस्थुः । वीतम् । शमित्रे ।

अस्थुर् वीतं ँवीत मस्थु रस्थुर् वीत(ग्म्) शमित्रे शमित्रे वीत मस्थु रस्थुर् वीत(ग्म्) शमित्रे ।

(31)[P14] 4.6.3.3(26)- वीतम् । शमित्रे । शमिता ।

वीत(ग्म्) शमित्रे शमित्रे वीतं ँवीत(ग्म्) शमित्रे शमिता शमिता शमित्रे वीतं ँवीत(ग्म्) शमित्रे शमिता ।

(32)[P14] 4.6.3.3(27)- शमित्रे । शमिता । यजद्ध्यै ॥

शमित्रे शमिता शमिता शमित्रे शमित्रे शमिता यजद्ध्यै यजद्ध्यै शमिता शमित्रे शमित्रे शमिता यजद्ध्यै ।

(33)[P14] 4.6.3.3(28)- शमिता । यजद्ध्यै ॥

शमिता यजद्ध्यै यजद्ध्यै शमिता शमिता यजद्ध्यै ।

(34)[P14] 4.6.3.3(29)- यजद्ध्यै ॥

यजद्ध्या इति यजद्ध्यै ।

(35)[P14] 4.6.3.3(30)- तुरीयः । यज्ञः । यत्र ।

तुरीयो यज्ञो यज्ञ स्तुरीय स्तुरीयो यज्ञो यत्र यत्र यज्ञ स्तुरीय स्तुरीयो यज्ञो यत्र ।

(36)[P14] 4.6.3.3(31)- यज्ञः । यत्र । हव्यम् ।

यज्ञो यत्र यत्र यज्ञो यज्ञो यत्र हव्य(ग्म्) हव्यं ँयत्र यज्ञो यज्ञो यत्र हव्यम् ।

(37)[P14] 4.6.3.3(32)- यत्र । हव्यम् । एति ।

यत्र हव्य(ग्म्) हव्यं ँयत्र यत्र हव्य मेत्येति हव्यं ँयत्र यत्र हव्य मेति ।

(38)[P14] 4.6.3.3(33)- हव्यम् । एति । ततः ।

हव्य मेत्येति हव्य(ग्म्) हव्य मेति तत स्तत एति हव्य(ग्म्) हव्य मेति ततः ।

(39)[P14] 4.6.3.3(34)- एति । ततः । पावकाः ।

एति तत स्तत एत्येति ततः पावकाः पावका स्तत एत्येति ततः पावकाः ।

(40)[P14] 4.6.3.3(35)- ततः । पावकाः । आशिषः ।

ततः पावकाः पावका स्तत स्ततः पावका आशिष आशिषः पावका स्तत स्ततः पावका आशिषः ।

(41)[P14] 4.6.3.3(36)- पावकाः । आशिषः । नः ।

पावका आशिष आशिषः पावकाः पावका आशिषो नो न आशिषः पावकाः पावका आशिषो नः ।

(42)[P14] 4.6.3.3(37)- आशिषः । नः । जुषन्ताम् ॥

आशिषो नो न आशिष आशिषो नो जुषन्ताम् जुषन्ताम् न आशिष आशिषो नो जुषन्ताम् ।

(43)[P14] 4.6.3.3(37)- आशिषः ।

आशिष इत्या - शिषः ।

(44)[P14] 4.6.3.3(38)- नः । जुषन्ताम् ॥

नो जुषन्ताम् जुषन्ताम् नो नो जुषन्ताम् ।

(45)[P14] 4.6.3.3(39)- जुषन्ताम् ॥

जुषन्तामिति जुषन्ताम् ।

(46)[P14] 4.6.3.3(40)- विमानः । एषः । दिवः ।

विमान एष एष विमानो विमान एष दिवो दिव एष विमानो विमान एष दिवः ।

(47)[P14] 4.6.3.3(40)- विमानः ।

विमान इति वि - मानः ।

(48)[P14] 4.6.3.3(41)- एषः । दिवः । मद्ध्ये ।

एष दिवो दिव एष एष दिवो मद्ध्ये मद्ध्ये दिव एष एष दिवो मद्ध्ये ।

(49)[P14] 4.6.3.3(42)- दिवः । मद्ध्ये । आस्ते ।

